# Kailasashailalingamahima

# કૈલાસશૈલલિઙ્ગમહિમા

## Document Information

Text title : Kailasashailalingamahima

File name : kailAsashailalingamahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 39 - kailAsashailaliNgamahimA | vAvRittashlokAH ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# કૈલાસશૈલલિઙ્ગમહિમા

ઈશ્વરઃ -
પશ્ય લિઙ્ગાનિ મે દેવિ મણિધામગતાન્યુમે ।
ધામમૌલિમહાકુમ્ભધારાવ્યાપ્તાનિ શઙ્કરિ ॥ ૧॥

ચન્દ્રચન્દનલિપ્તાનિ ત્રિપુણ્ડ્રોજ્વલિતાનિ ચ ।
મણિમુન્દરમન્દારપુષ્પમૌલીનિ શઙ્કરિ ॥ ૨॥

બિલ્વોત્તમાઙ્ગસૌન્દર્યસારગર્ભાણિ પાર્વતિ ।
વરકાકોદરાનદ્ધફણાભૂષણકાન્યપિ ॥ ૩॥

નન્દનાનન્દમાલાભિશ્ચન્દનાલઙ્કૃતાન્યપિ ।
દાવદગ્ધાગરુરસૈર્ધૂપિતાનિ સદામ્બિકે ॥ ૪॥

દીપિતાનિ મણિજ્વાલાજાલકાન્તીનિ પશ્ય મે ।
યથા મે દેવદેવેશિ મનો લિઙ્ગપ્રપૂજને ॥ ૫॥

ન તથા જગતો જાલનિર્માણ મે મનોઽમ્બિકે ।
તત્પાલને તદ્ધનને નાન્યધર્મેષુ મે મનઃ ॥ ૬॥

નગોઽયં મમ કૈલાસસ્સર્વાનન્દપયોનિધિઃ ।
એતસ્ય તપસા તુષ્ટઃ પ્રાયચ્છં વરમુત્તમમ્ ॥ ૭॥

તવમૌલો નિવત્સ્યામિ નાનાલિઙ્ગસમાશ્રયઃ ।
પ્રલયેનૈવ નાશોઽસ્તિ મત્સાન્નિધ્યવલાત્તવ ॥ ૮॥

ઇત્યુક્તો ગિરિરાજોઽયં મમાનન્દપ્રદસ્સદા ।
(ઇત્યુક્તો ગિરિરાજોઽયં મમાનન્દપ્રદસ્શિવઃ ।)
પ્રલયે સાગરાસ્સર્વે કૈલાસસ્ય શતોત્તરે ॥ ૯॥

પાદમૂલે સ્થિતિં દેવિ યાસ્યન્તિ ચ નગા અપિ ।
મહર્લોકાવધિ મહાવીચીકલ્લોલસઙ્કુલૈઃ ॥ ૧૦॥

સપ્તભિઃ પવનૈર્વાપિ ચાલિતાસ્તે તદાદ્રિજે ।
હિમાચલે મન્દરેઽપિ કેદારેશ્વરસઞ્જ્ઞકઃ ॥ ૧૧॥

નિવત્સ્યામિ શુભાપાઙ્ગિ સદા લિઙ્ગાશ્રયો હિ સઃ ।
મેરાવથિ મહાદેવિ શિખરં મમ સુન્દરં ॥ ૧૨॥

તદુત્તરેઽપિકૈલાસે નાનાલિઙ્ગૈકભાસુરમ્ ।
શિખરં તત્ર દેવૈશ્ચ પૂજિતો નિવસામ્યહમ્ ॥ ૧૩॥

એક એવાહમદ્વૈતો નીરૂપોઽહમિહાદ્રિજે ।
ત્વયા કૈલાસશિખરે તુષ્ટો વાસમરોચયમ્ ॥ ૧૪॥

સર્વાવાસોઽપ્યહં દેવિ કૈલાસે નિવસામ્યહમ્ ।
અનન્તાર્બુદલિઙ્ગાનિ મમ કૈલાસપર્વતે ॥ ૧૫॥

તત્પ્રાસાદમણીરાગશિખરાદ્યોદિતપ્રભાઃ ।
તિરસ્કૃતાર્કચન્દ્રેન્દ્રા ન તચ્છક્યં હિ વર્ણિતુમ્ ॥ ૧૬॥

તત્રાપિ કોટિલિઙ્ગાનાં ગણના કિલ સુન્દરિ ।
ઉત્તમેષુ મહાદેવિ તત્રાપારેષુ પાર્વતિ ॥ ૧૭॥

તત્રાપિ લિઙ્ગસાહસ્રં મમૈવ પ્રીતિદાયકમ્ ।
દર્શનાત્સંસ્પર્શનાચ્ચ પૂજનાન્મોક્ષદાયકમ્ ॥ ૧૮॥

વિના જ્ઞાનેન તપસા કર્મણા શ્રદ્ધયા શિવે ।
નયજ્ઞૈર્ન વ્રતાચારૈર્યોગૈસ્સાઙ્ખ્યૈર્મહેશ્વરિ ॥ ૧૯॥

સાગતિર્નૈવ લભ્યેત યથા તલ્લિઙ્ગપૂજયા ।
કૈલાસાચલમૌલિસ્થલિઙ્ગાનાં દર્શનં શિવે ॥ ૨૦॥

દુર્લભં સર્વદેવાનાં નૃણાં કિમુત શઙ્કરિ ।
કૈલાસેશ્વરમુખ્યાનિ લિઙ્ગાન્યત્યદ્ભુતાનિચ ॥ ૨૧॥

મણિગર્ભગૃહાધારસંસ્થિતાન્યગજે સદા ।
પ્રોદ્યત્કુમ્ભપતાકાનિ મયા સમ્પૂજિતાન્યપિ ॥ ૨૨॥

પ્રાતસ્સઙ્ગવસાયાહ્નપ્રદોષેષુ મહેશ્વરિ ।
તેષુ લિઙ્ગાવલિં ભદ્રે શ ृણુ વક્ષ્યામિ સાદરમ્ ॥ ૨૩॥

કીર્તનશ્રવણેનાપિ પાપભેદીનિ શઙ્કરિ ।
સ્વર્ગાપવર્ગદાન્યાશુ નૃભિસ્તત્કીર્તિતાન્યપિ ॥ ૨૪॥

પૂર્વતો મમ કૈલાસે નાનાલિઙ્ગકુલેષ્વપિ ।
તન્નિરેર્દક્ષિણે ચાપિ પશ્ચાદપિ શુભાનને ॥ ૨૫॥

તદુત્તરેઽપિ દેવેશિ નાનાજ્યોતિર્મયાનિ ચ ।
ન શક્યં વર્ણિતું દેવિ દેવૈશ્શેષેણ ભામિનિ ॥ ૨૬॥

આદ્યં મઙ્ગલદં દેવિ કૈલાસેશ્વરસઞ્જ્ઞિતમ્ ।
યન્નવેદૈરપિજ્ઞાતં વેદાન્તૈરખિલૈરપિ ॥ ૪૨॥

અસ્મિન્નેવ લયં યાન્તિ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
(અત્રૈવાન્તેલયં યાન્તિ બ્રહ્મવિષ્ણુમહેશ્વરાઃ) ।
લયનાત્સર્વજગતાં લિઙ્ગમિત્યુચ્યતે બુધૈઃ ॥ ૪૩॥

મમૈવ નિર્ગુણં સાક્ષાદ્રૂપમેતન્મહેશ્વરિ ।
અસ્યૈવ ભાસા સર્વેઽપિ ભાન્તિ લોકાશ્ચતુર્દશ ॥ ૪૪॥

અસ્યૈવ ચેતનાત્સર્વજગચ્ચેતયતિ પ્રિયે ।
અસ્યૈવાનન્દલેશેન સર્વાનન્દમયં પ્રિયે ॥ ૪૫॥

લિઙ્ગમેતદ્ભૂમધામસોમધામપ્રભાધિકમ્ ।
એતદ્બ્રહ્મૈવ દેવેશિ મમૈવ પરમં પ્રિયમ્ ॥ ૪૬॥

યસ્મિન્ત્સમ્પૂજિતેજ્ઞાતેધ્યાતેસ્વાત્મનિશૈલજે ।
લિઙ્ગીલિઙ્ગાતિગોભાતિતદિદંલિઙ્ગમુત્તમમ્ ॥ ૫૩॥

નામરૂપાતિગં ભાતિ કૈલાસેશ્વરસઞ્જ્ઞિતમ્ ।
તન્નામાનિ શ‌ૃણુષ્વાર્યે સાદરં કમલાનને ॥ ૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલલિઙ્ગમહિમા ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૩૯ - કૈલાસશૈલલિઙ્ગમહિમા । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 39 - kailAsashailalingamahimA . vAvRRittashlokAH ..

Notes:
Īśvara ઈશ્વર describes to Devī દેવી about His Residence and the several Śivaliṅga-s શિવલિઙ્ગ at Kailāsa કૈલાસ, especially the Kailāseśvaraliṅga કૈલાસેશ્વરલિઙ્ગ.

Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasashailalingamahima*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*